श्रीकामाक्षीस्तोत्रम् २

{॥ श्री कामाक्षीस्तोत्रम् २ ॥}

काञ्चीनूपुररत्नकङ्कणलसत्केयूरहारोज्ज्वलां

काश्मीरारुणकञ्चुकाञ्चितकुचां कस्तूरिकाचर्चिताम् ।

कल्हाराञ्चितकल्पकोज्ज्वलमुखीं कारुण्यकल्लोलिनीं

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ १॥

कामारातिमनःप्रियां कमलभूसेव्यां रमाराधितां

कन्दर्पाधिकदर्पदानविलसत्सौन्दर्यदीपाङ्कुराम् ।

कीरालापविनोदिनीं भगवतीं काम्यप्रदानव्रतां

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ २॥

कादम्बप्रमदां विलासगमनां कल्याणकाञ्चीरवां

कल्याणाचलपादपद्मयुगलां कान्त्या स्फुरन्तीं शुभाम् ।

कल्याणाचलकार्मुकप्रियतमां कादम्बमालाश्रियं

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ३॥

गन्धर्वामरसिद्धचारणवधूध्ध्येयां पताकाञ्चितां

गौरीं कुङ्कुमपङ्कपङ्कितकुचद्वन्द्वाभिरामां शुभाम् ।

गम्भीरस्मितविभ्रमाङ्कितमुखीं गङ्गाधरालिङ्गितां

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ४॥

विष्णुब्रह्ममुखामरेन्द्रविलसत्कोटीरपीठस्थलां

लाक्षारञ्जितपादपद्मयुगलां राकेन्दुबिम्बाननाम् ।

वेदान्तागमवेद्यचिन्त्यचरितां विद्वज्जनैरावृतां

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ५॥

माकन्दद्रुममूलदेशमहिते माणिक्यसिंहासने

दिव्यां दीपितहेमकान्तिनिवहां वस्त्रावृतां तां शुभाम् ।

दिव्याकल्पितदिव्यदेहभरितां दृष्टिप्रमोदार्पितां

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ६॥

आधारादिसमस्तचक्रनिलयामाद्यन्तशून्यामुमां

आकाशादिसमस्तभूतनिवहाकारामशेषात्मिकाम् ।

योगीन्द्रैरपि योगिनीशतगणैराराधितामम्बिकां

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ७॥

ह्रीङ्कारप्रणवात्मिकां प्रणमतां श्रीविद्यविद्यामयीं

ऐं क्लीं सौं रुचि मन्त्रमूर्तिनिवहाकारामशेषात्मिकाम् ।

ब्रह्मानन्दरसानुभूतिमहितां ब्रह्मप्रियंवादिनीं

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ८॥

सिद्धानन्दजनस्य चिन्मयसुखाकारां महायोगिनीं

मायाविश्वविमोहिनीं मधुमतीं ध्यायेत् शुभां ब्राह्मणीम् ।

ध्येयां किन्नरसिद्धचारणवधू ध्येयां सदा योगिभिः

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ९॥

कामारिकामां कमलासनस्थां

काम्यप्रदां कङ्कणचूडहस्तां ।

काञ्चीनिवासां कनकप्रभासां

कामाक्षिदेवीं कलयामि चित्ते ॥ १०॥

इति श्री कामाक्षीस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by P. R. Ramamurthy

http://prramamurthy1931.blogspot.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

kamakshi Stotram 2 Lyrics in Devanagari PDF
% File name : kAmAkShIstotram2.txt
% Category : stotra
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : P. R. Ramamurthy
% Proofread by : P. R. Ramamurthy
% Description/comments : %
http://prramamurthy1931.blogspot.com/2011/04/hymns-to-srimata-sri-kamakshi-stotram.html
% Latest update : April 24, 2015

% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [December 11, 2015] at Stotram Website